# मीनाक्षि पञ्चरत्न स्तोत्रं

उद्यद्भानु सहस्रकोटिसदृशां केयूरहारोज्ज्वलां
बिंबोष्टिं स्मितदन्तपंक्तिरुचिरां पीतांबरालंकृतां
विष्णुब्रह्मसुरेन्द्रसेवितपदां तत्वस्वरूपां शिवं
मीनाक्षीं प्रणतोस्मि सन्ततमहं कारुण्यवारां निधिंः (1)

मुक्ताहारलसत्किरीटरुचिरां पूर्णेन्दुवक्त्र प्रभां
षिञ्जन्नूपुरकिङ्किणिमणिधरां पद्मप्रभाभासुरां
सर्वाभीष्टफलप्रदां गिरिसुतां वाणीरमासेवितां
मीनाक्षीं प्रणतोस्मि सन्ततमहं कारुण्यवारां निधिंः (2)

श्रीविद्यां शिववामभागनिलयां ह्रींकारमन्त्रोज्ज्वलां
श्रीचक्राङ्कित बिन्दुमध्यवसतिं श्रीमत्सभानायकीं
श्रीमत्षण्मुखविघ्नराजजननीं श्रीमज्जगन्मोहिनीं
मीनाक्षीं प्रणतोस्मि सन्ततमहं कारुण्यवारां निधिंः (3)

श्रीमत्सुन्दरनायकीं भयहरां ज्ञानप्रदां निर्म्मलां
श्यामाभां कमलासनार्च्चितपदां नारायणस्यानुजां
वीणावेणुमृदंगवाद्यरसिकां नानाविधां अंबिकां
मीनाक्षीं प्रणतोस्मि सन्ततमहं कारुण्यवारां निधिंः (4)

नानायोगिमुनीन्द्रहृन्निवसतीं नानार्त्थसिद्धिप्रदां
नानापुष्पविराजितांघ्रियुगळां नारायणेनार्च्चितां
नादब्रह्ममयीं परात्परतरां नानार्त्थतत्वात्मिकां
मीनाक्षीं प्रणतोस्मि सन्ततमहं कारुण्यवारां निधिंः (5)